# ॥ आदित्याष्टोत्तरशतनामस्तोत्रम् ॥

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक्।
पीडा च दुःसहा राजन् जायते सततं नृणाम्॥ १ ॥

पीडानाशाय राजेन्द्र नामानि शृणु भास्वतः।
सूर्यादीनां च सर्वेषां पीडा नश्यति शृण्वतः॥ २ ॥

आदित्यः सविता सूर्यः पूषाऽर्कः शीघ्रगो रविः।
भगस्त्वष्टाऽर्यमा हंसो हेलिस्तेजोनिधिर्हरिः॥ ३ ॥

दिननाथो दिनकरः सप्तसप्तिः प्रभाकरः।
विभावसुर्वेदकर्ता वेदाङ्गो वेदवाहनः॥ ४ ॥

हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः।
पद्मिनीबोधको भानुर्भास्करः करुणाकरः॥ ५ ॥

द्वादशात्मा विश्वकर्मा लोहिताङ्गस्तमोनुदः।
जगन्नाथोऽरविन्दाक्षः कालात्मा कश्यपात्मजः॥ ६ ॥

भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः।
जपाकुसुमसङ्काशो भास्वानदितिनन्दनः॥ ७ ॥

ध्वान्तेभसिंहः सर्वात्मा लोकनेत्रो विकर्तनः।
मार्तण्डो मिहिरः सूरस्तपनो लोकतापनः॥ ८ ॥

जगत्कर्ता जगत्साक्षी शनैश्चरपिता जयः।
सहस्ररश्मिस्तरणिर्भगवान् भक्तवत्सलः॥ ९ ॥

विवस्वानादिदेवश्च देवदेवो दिवाकरः।
धन्वन्तरिर्व्याधिहर्ता दद्रुकुष्ठविनाशनः॥ १० ॥

चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तनः।
लोकशोकापहर्ता च कमलाकर आत्मभूः॥ ११ ॥

नारायणो महादेवो रुद्रः पुरुष ईश्वरः।
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुखः॥ १२ ॥

इन्द्रोऽनलो यमश्चैव नैर्ऋतो वरुणोऽनिलः।
श्रीद ईशान इन्दुश्च भौमः सौम्यो गुरुः कविः॥ १३ ॥

सौरिर्विधुन्तुदः केतुः कालः कालात्मको विभुः।
सर्वदेवमयो देवः कृष्णः कामप्रदायकः॥ १४॥

य एतैर्नामभिर्मर्त्यो भक्त्या स्तौति दिवाकरम्।
सर्वपापविनिर्मुक्तः सर्वरोगविवर्जितः॥ १५॥

पुत्रवान् धनवाञ्छ्रीमान् जायते स न संशयः।
रविवारे पठेद्यस्तु नामान्येतानि भास्वतः॥ १६॥

पीडाशान्तिर्भवेत्तस्य ग्रहाणां च विशेषतः।
सद्यः सुखमवाप्नोति चाऽऽयुर्दीर्घं च नीरुजम्॥ १७॥

॥ इति श्री-भविष्यपुराणे आदित्य अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Aditya_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits